(पत्र, पुष्प, फल, काष्ठ छाया एवं औषधि प्रदान करने वाले पादपों एवं वृक्षो की उपयोगिता वर्तमान समय में पूर्वापेक्षया अधिक है। वैज्ञानिकों के अनुसार वृक्षों एवं वनस्पतियों के अभाव में मनुष्यों के लिए जीवित रहना असम्भव प्रतीत होता है। नाना-वाहनों तथा कल-कारखानों से निकलने वाले धुएँ से समस्त वायु ही विषैली हो रही है जिससे न केवल मानव–समूह अपितु सम्पूर्ण प्राणि-जगत् का जीवन संकट में पड़ता जा रहा है। पर्यावरण दिन-प्रतिदिन असंतुलित हो रहा है। यत्र-तत्र अनावृष्टि की समस्या भी बढती जा रही है। अतः आवश्यक है कि अधिक से अधिक वृक्षारोपण किया जाए जिससे प्रकृति संतुलित रहे और प्राणि-जगत् के साथ मानव-जीवन भी सुखमय हो सके।)

भूतले मानवानां समाज इव अन्येऽपि समवाया वर्तन्ते पशूनां पक्षिणां वृक्षाणां च। यथा मानवा गुणभेदेन आकारप्रकारदृष्ट्या अभिरुचिदिशा च भिद्यन्ते तथैव वृक्षा अपि। केषाञ्चिद् वृक्षाणां महत्त्वं गृहनिर्माणदृष्ट्या, केषाञ्चित्

औषधदृष्ट्या केषाञ्चिच्च फलपुष्पदृष्ट्या। मल्लिका, कर्णिकारः, यूथिका, पारिजात इत्येताः वनस्पतयः पूजादिनिमित्तं सौरभयुक्तानि पुष्पाण्येव प्रस्तुवन्ति। परन्तु कदलीरसालजम्बूनिम्बूकनारङ्गादितरवस्तुविविधस्वादमयानि फलान्याहरन्ति। एवमेव सरलदेवदारुनिम्बादिवृक्षा गृहनिर्माणार्थं काष्ठानि प्रयच्छन्ति।

वृहदारण्यकनाम्नि उपनिषदि वृक्षाणां महत्त्वं प्रतिपादयन् वृक्षपुरुषसाम्यम् अवलोक्यते। महर्षियाज्ञवल्क्येन उक्तम् –

यथा वृक्षोवनस्पतिस्तथैवपुरुषोऽमृषा।
तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः।।

त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः।
तस्मात्तदातृणात् प्रेति रसो वृक्षादिवाहतात्।।

वैज्ञानिकदृष्ट्या तु सिद्धमिदं यद्वृक्षेष्वपि चैतन्यं वर्तते। कामं तच्चैतन्यं मानवपशुपक्षिचैतन्यमिव व्यक्तं न दृश्यते तथापि एतद् वक्तुं शक्यते यद् वनस्पतयोऽपि सुखदुःखादिभावान् सम्यगनुभवन्ति।

कस्मिन् क्षुपे, कस्मिन् फले, पुष्पे वा को नु वर्तते औषधीयो गुणः इति विज्ञायैव ते ऋषयः चरकसुश्रुतादयः महनीयमायुर्वेदाख्यं शास्त्रं प्रतिष्ठापितवन्तः। वृक्षाणामभावे मानवजीवनं सर्वथा दुष्करं स्यात् यतो हि वनस्पतयो दूषितपवनं निगीर्य शुद्धं आक्सीजनाख्यं प्राणवायुम् विमु चन्ति यं गृहीत्वा प्राणिनः जीवितुं शक्नुवन्ति। एवं हि वृक्षाः मानवानां बन्धुभूताः प्रतीयन्ते।

अस्मादेव कारणात् वृक्षारोपणमस्माभिः करणीयं तिष्ठति। यदि भवनं परितः सन्ति वृक्षास्तर्हि शुद्धप्राणवायुरपि पुष्कलत्वेन अवाप्स्यते। सर्वेऽपि तत्र स्वस्थाः स्थास्यन्ति। तत्रापि गृहद्वारे निम्बरोपणमुपादेयं प्रतीयते। यतो हि निम्बपल्लवेषु तद्विमुक्तपवनेषु च भवन्ति विविधरोगापहारका गुणाः। पिप्पलवृक्षः सर्वाधिकं प्राणवायुं (आक्सीजनाख्यं) विसृजति इति रहस्यं जानन्ति वैज्ञानिकाः। अत एव पिप्पलच्छायायां शयाना जना नीरोगा जायन्ते।

वृक्षारोपणेऽन्यापि कापि प्रशस्ता दृष्टिर्वर्तते भारतीयानाम्। इयं दृष्टिः सर्वानपि वृक्षान् दैवीशक्तिसम्पन्नान् घोषयति। अश्वत्थे भगवतः नारायणस्य निवासः। निम्बवृक्षे भगवत्याः शीतलायाः। मन्दारवृक्षे गणपतिर्वसति। तुलस्यामपि विष्णुप्रिया वृन्दा। शमीवृक्षेऽग्निस्तिष्ठति। बिल्ववृक्षे लक्ष्मीः। एवमेव नवग्रहाणां प्रत्येकं निवासभूतः कोऽपि वृक्षः समुपदिष्टः। अनया देवदृष्ट्या सम्प्रेरिता अपि जना वृक्षारोपणं कृत्वा धन्यमात्मानं मन्यन्ते।

वृक्षाः खलु घर्मसन्तप्तेभ्यः छायासुखं बुभुक्षितेभ्यस्तृप्तिसुखं च प्रयच्छन्ति। अत एव सर्वैरपि वृक्षा आरोपणीयाः। यथोक्तं स्मृतिकारैः –

> दशकूपसमा वापी दशवापीसमो ह्रदः
> दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः।।

शब्दार्थाः

समवायाः	- समूहाः	– समूह
भिद्यन्ते	- पृथक् भवन्ति	अलग होते हैं।
मल्लिका	मल्लीपुष्पम्	- बेला
कर्णिकार	पुष्पविशेष	कनेर, कनैल
यूथिका	- यूथी	– जूही

पारिजातम्	—	हरसिंगाराख्य पुष्पम	-	हरसिंगार
क्षुपे	-	पादपे (लघुवृक्षे)	-	पौधे में
महनीयम्	—	महत्त्वपूर्णम्	—	महत्त्वपूर्ण
निपीय	—	पीत्वा	--	पीकर
अवाप्स्यते	—	लप्स्यते	—	प्राप्त की जाएगी
अश्वत्थे	—	पिप्पले	—	पीपल वृक्ष पर
मन्दारवृक्षे	—	तरुविशेषे	—	मन्दार के वृक्ष पर
विशदयद्भिः	—	विस्तारयद्भि	-	विस्तार करते हुए
पर्णानि	--	पत्राणि	-	पत्ते
उत्पटः	—	रसविशेष	-	(वृक्ष की छाल से निकलनेवाला) रस
उत्पाटिका	—	त्वचा	-	छाल
प्रतिपादयन्	—	विशेषेण कथयन्	—	बताते हुए
ह्रदः	—	सरः	--	सरोवर, तालाब
प्रस्यन्दि	—	वहति (निःसरति)	—	बहता है।
त्वक्	—	त्वचा	—	छाल, खाल

[illegible]

- वनस्पतयः मानवजीवनस्य प्राणभूता सन्ति।
- वृक्षा प्राणिभ्यः पत्राणि, पुष्पाणि, फलानि, औषधानि, काष्ठानि च यच्छन्ति।
- वनस्पतयः जीवनाय प्राणिभ्यः ऑक्सीजनाख्य प्राणवायुम् प्रयच्छन्ति।
- भारतीयसंस्कृतौ विभिन्नेषु वृक्षेषु विविधदेवीदेवाना च निवासः स्वीकृत ।
- उपनिषत्सु वृक्षपुरुषसाम्यम् अवलोक्यते।
- वैज्ञानिकै वनस्पतिष्वपि चैतन्यमस्ति इति साधितम्।
- वृक्षारोपणे एकतः प्राणिजगत् सुखं लभते अपरतश्च प्रदूषणसमस्यायाः निराकरणम् (समाधानम्) अपि भवति।

1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकेनैव पदेन वदत–
   - क. गृहनिर्माणार्थं काष्ठानि के प्रयच्छन्ति ?
   - ख. वृक्षाः केषाम् बन्धुभूताः सन्ति ?
   - ग. किं गृहीत्वा प्राणिनः जीवितुं शक्नुवन्ति ?
   - घ. गृहद्वारे कस्य वृक्षस्यारोपणमुपादेयं प्रतीयते ?
   - ङ. सर्वाधिकं प्राणवायुं कः विसृजति ?

1. प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत–
   - क. विविधस्वादमयानि फलानि केभ्य. वृक्षेभ्यः प्राप्यन्ते ?
   - ख. वैज्ञानिकैः किं साधितम् ?
   - ग. आहते सति वृक्षेभ्यः कि वहति ?
   - घ. वृक्षाः जनेभ्यः किं कि प्रयच्छन्ति ?
   - ङ. उपनिषत्सु वृक्षाणा तुलना कैः सह कृता ?

2. स्थूलाक्षरपदानि आधृत्य प्रश्ननिर्माणं कुरुत–
   - क. वनस्पतय. **पुष्पाणि** प्रस्तुवन्ति।
   - ख. वृक्षाणाम् अभावे **मानवजीवनं** दुष्कर स्यात्।
   - ग. **निम्बपल्लवेषु** विविधरोगापहारका. गुणाः भवन्ति।
   - घ वृक्षाः **घर्मसन्तप्तेभ्यः** छायासुख प्रयच्छन्ति।
   - ङ. दशपुत्रसमो **द्रुमः** भवति।
   - च **ऋषयः** चरकसुश्रुतादयो महनीयमायुर्वेदं प्रतिष्ठापितवन्तः।

3. अधोलिखितेषु पदेषु सन्धिम्/सन्धिविच्छेदं कुरुत–

   क **यथा** कृषिः + अपि = कृषिरपि

   (i) प्राणवायु. + अपि = ________

   (ii) सर्वैः + अपि = ________

ख यथा केषाञ्चिच्च = केषाञ्चित् + च

(i) तच्चैतन्यम् = ______ + ______

(ii) कुत्रचिच्च = ______ + ______

ग. यथा अन्येऽपि = अन्ये + अपि

(i) सर्वेऽपि = ______ + ______

(ii) वृक्षेऽस्मिन् = ______ + ______

घ यथा वृक्षास्तर्हि = वृक्षा. + तर्हि

(i) तरवस्तु = ______ + ______

(ii) अग्निस्तिष्ठति = ______ + ______

4. **अधोदत्तपदानां विलोमपदानि पाठात् चित्वा लिखत–**

दोषाः ______

अस्वस्थाः ______

वृक्षे ______

उद्गीर्य ______

जडत्वम् ______

मनुष्याः ______

अनुपादेयम् ______

स्वल्पत्वेन ______

5. **क.** **उदाहरणमनुसृत्य प्रकृतिप्रत्ययविभागं कुरुत–**

यथा करणीयम् = कृ + अनीयर्

दर्शनीयम् = ______ + ______

आरोहणीयम् = ______ + ______ + ______

रक्षणीयम् = ______ + ______

पठनीयम् = ______ + ______

ख. **उदाहरणमनुसृत्य 'ठक्' प्रत्ययं योजयित्वा रूपाणि लिखत–**

यथा विज्ञान + ठक् = वैज्ञानिक.

______ + ______ = ऐतिहासिक

पुराण + ठक् = ________

________ + ________ = दैनिक.

वेद + ठक् = ________

________ + ________ = औपनिषदिकः

6. **स्थूलपदानि संशोध्य वाक्यानि पुनः लिखत–**

क. वृक्षाः सौरभयुक्तानि पुष्पाणि **ददन्ति**।

ख. **वृक्षाणां** मानवजीवने वहवः उपयोगाः सन्ति।

ग. **लक्ष्मेः** निवासः बिल्ववृक्षे भवति।

घ. वैज्ञानिकैः वृक्षाणां विषये महत्वपूर्णा सूचना **दत्तम्**।

ङ. गावः क्षीरं शरीर पोषयति बुद्धिं च वर्धयति।

च. वृक्षारोपणं सर्वैरपि अस्माभिः **करणीयः**।

7. **वृक्षाणाम् चित्राणि दृष्ट्वा प्रतिवृक्षम् प्रतिपादपं प चवाक्यानि रचयत–**

निम्बतरुः

आम्रवृक्षः

कदलीपादपः

तुलसीपादपः

वृक्षारोपणमहत्त्वम्

प्रदूषणसमस्यायाः विषये अद्य सम्पूर्णः विश्वः चिन्तातुर. अस्ति। संयुक्त–राष्ट्रसंघेन अपि अस्मिन् विषये चिन्ता प्रकटिता। प्रदूषण–निवारणस्य उपायेषु 'वृक्षारोपणं' सर्वोत्कृष्टं मतम्।

प्रदूषणसमस्या तदैव उपस्थिता यदा मानवेन स्वार्थसिद्धये वृक्षकर्तनम् आरब्धम्। प्रकृतौ सन्तुलनस्थापनार्थं वृक्षरक्षणम् वृक्षारोपणम् च आवश्यकम्। इदम् सन्तुलनम् एव भूक्षरणात् अतिवृष्टेः अनावृष्टेः च रक्षितुम् समर्थम्। धूमानां विषाक्तवायूनां च शोषणस्य सामर्थ्यम् वृक्षेषु एव। येन वातावरणम् शुद्धम् पवित्रम् च भवति।

किं बहुना नष्टप्रायाणां पशुपक्षिणाम् जातीनाम् च रक्षा अपि अनेनैव सम्भवा। श्रीमद्भागवते अपि भगवान् कृष्णः वृक्षाणा महत्त्वं बलरामं प्रति निवेदितवान्

क. पश्यैतान् महाभागान् परार्थैकान्तजीवितान्–
वातवर्षातपहिमान् सहन्तो वारयन्ति नः।।

ख. पत्रपुष्पफलच्छाया मूलवल्कलदारुभिः
गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते।।

अत्र अन्येऽपि श्लोकाः दृष्टव्याः

क. अहो ! एषां वर जन्म सर्वप्राण्युपजीवनम्।
धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः।।

ख. छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव।।

ग. बहुभिर्बत किं जातैः पुत्रैः धर्मार्थवर्जितैः।
वरमेको पथि तरुर्यत्र विश्रमते जनः।।

घ. अनेकफलप्रदो वृक्षो निरपेक्षो यतिप्रभः।
कर्त्तव्यं रोपणं तस्य वृक्षो रक्षति रक्षितः।।

√ मुच्' (त्यागे) लट्लकारः

पुरुषः	ए.व.	द्वि.व.	ब.व.
प्रथमः	मुञ्चति	मुञ्चतः	मुञ्चन्ति
मध्यमः	मुञ्चसि	मुञ्चथः	मुञ्चथ
उत्तमः	मुञ्चामि	मञ्चावः	मुञ्चामः

√ आप्' (प्राप्तकरणे) लट्लकार.

पुरुषः	ए.व.	द्वि.व.	ब.व.
प्रथमः	आप्नोति	आप्नुत.	आप्नुवन्ति
मध्यमः	आप्नोषि	आप्नुथ	आप्नुथ
उत्तम'	आप्नोमि	आप्नुव	आप्नुमः

√ दा' (दाने) लट्लकारः

पुरुषः	ए.व.	द्वि.व.	ब.व.
प्रथमः	ददाति	दत्त'	ददति
मध्यम	ददासि	दत्थः	दत्थ
उत्तम.	ददामि	दद्वः	दद्मः

पञ्चमः पाठः

(व्यक्ति को सन्मार्ग पर ले जाने की विधि को नीति कहते हैं। "नीयते प्राप्यते धर्मोऽनया" इति नीतिः। "विदुरनीति" महाभारत का एक प्रसिद्ध तथा उपादेय प्रसङ्ग है। इसमें महात्मा विदुर ने राजा धृतराष्ट्र को लोक परलोक में कल्याण करने वाली बहुत सी बातें समझाई हैं। उद्योगपर्व के आठ अध्यायों (33वें से 40वें तक) में यही नीतिपरक श्लोक उपदेशात्मक ढंग से कहे गए हैं। प्रस्तुत पाठ में कठोर वचन, चारित्रिक महत्त्व, हानिलाभ की दृष्टि से कर्त्तव्य का निर्धारण, स्नेही जनों को सब कुछ स्पष्ट बता देना, छह सुख, समूह में रहना, मित्र बनाने का विधान, निर्दोष को दण्ड देने से उत्पन्न भय तथा हितकारी वचन से सम्बन्धित भावों वाले श्लोक संकलित किए गए हैं।

पाठ का उद्देश्य विद्यार्थियों के ज्ञानवर्धन के साथ–साथ उनमें नैतिक मूल्यों के प्रति आस्था भी उत्पन्न करना है, जिन्हें वे अपने जीवन में उतार सकें।)

रोहते सायकैर्विद्धं वनं परशुना हतम्।
वाचा दुरुक्तं वीभत्सं न संरोहति वाक्क्षतम्।।1।।

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते।।2।।

किन्नु मे स्यादिदं कृत्वा किन्नु मे स्यादकुर्वतः।
इति कर्माणि संचित्य कुर्याद्वा पुरुषो न वा।।3।।

शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियम्।
अपृष्टस्यास्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवम्।।4।।

आरोग्यमानृण्यमविप्रवासः सद्भिर्मनुष्यैः सह संप्रयोगः।
स्वप्रत्ययावृत्तिरभीतवासः षड्जीवलोकस्य सुखानि राजन्।।5।।

एकः स्वादु न भु जीत एकश्चार्थान्न चिन्तयेत्।
एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात्।।6।।

मत्या परीक्ष्य मेधावी बुद्ध्या सम्पाद्य चासकृत्।
श्रुत्वा दृष्ट्वाथ विज्ञाय प्राज्ञैर्मैत्रीं समाचरेत्।।7।।

न स रात्रौ सुखं शेते ससर्प इव वेश्मनि।
यः कोपयति निर्दोषं सदोषोऽभ्यन्तरे जनः।।8।।

सुलभाः पुरुषाः राजन् सततं प्रियवादिनः।।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः।।9।।

रोहते	–	प्ररोहति	–	उगता है
विद्धम्	–	क्षतम्	–	बिधा हुआ, घायल
बीभत्सम्	–	भयावहम्	–	भयानक
मृजया	–	मार्जनेन, स्नानकृतशुद्ध्या	–	जल द्वारा शुद्धि से
वृत्तेन	–	सदाचारेण	–	सदाचार से
अकुर्वतः	–	न कुर्वतः	–	न करते हुए का

संचित्य	–	विचार्य	–	भली भांति सोच विचार कर
द्वेष्यम्	–	द्वेषयोग्यम्	–	द्वेष के योग्य
आनृण्यम्	–	ऋणस्य अभाव·	–	कर्ज का न होना
अविप्रवासः	–	विदेशे न वासः	–	अन्य देश मे वास न करना
स्वप्रत्ययावृत्तिः	–	आत्मविश्वासे सुदृढः	–	आत्मविश्वास मे सुदृढ
अभीतवासः	–	निर्भयं निवास.	–	निडर होकर रहना
असकृत्	–	न सकृत्	–	अनेकशः
विज्ञाय	–	ज्ञात्वा	–	जानकर
वेश्मनि	–	गृहे	–	घर में
कोपयति	–	क्रोधयति	–	क्रोधित करता है
अभ्यन्तरे	–	अन्तःकरणे	–	अपने अन्दर
पथ्यस्य	–	हितकारिवचनस्य	–	लाभकारी वचनों का

- मनुष्य· कदापि कटुवचनानि न ब्रूयात्।
- धर्मस्य सत्येन, विद्याया· योगेन, रूपस्य सम्मार्जनेन, कुलस्य च सदाचारेण रक्षा भवति।
- मनुष्यः गुणदोषान् परीक्ष्य एव कर्मणि प्रवृत्तः भवेत्।
- यस्य कस्यचिदपि शुभचिन्तक. नर. तस्य प्रीतिमप्रीतिम् अविचार्य सत्यं ब्रूयात्।
- जीवलोकस्य षड्सुखानि सन्ति।
- मानव. मिलित्वा चलेत्, मिलित्वा खादेत्, मिलित्वा च जीवनं यापयेत्।
- हितं मनोहारि च दुर्लभं वचः।

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकेनैव पदेन वदत–**
   - क. कैः विद्धं वनं रोहते ?
   - ख. विद्या केन रक्ष्यते ?
   - ग. जीवलोकस्य कति सुखानि ?

घ. एकः किं न भुञ्जीत ?

ङ. नरः कैः सह मैत्रीं समाचरेत् ?

1. **अधोलिखितानाम् प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत–**

क. जीवलोकस्य षड् सुखानि कानि कानि सन्ति ?

ख. केन क्षतः नरः न संरोहति ?

ग. एकाकी किं किं न कुर्यात् ?

घ. कः रात्रौ सुखं न शेते ?

ङ. कीदृशाः पुरुषाः लोके सुलभाः ?

2. **सन्धिम्/सन्धिविच्छेदं कुरुत–**

क. (i) स्यादिदम् – स्यात् +

(ii) स्यादकुर्वतः – ________ + अकुर्वतः

(iii) ________ तत् + ब्रूयात् ________

(iv) गच्छेदध्वानम् = ________ + ________

ख. (i) सायकैर्विद्धम् – सायकैः + ________

(ii) दुरुक्तम् – ________ + उक्तम्

(iii) ________ सद्भिः + मनुष्यैः

(iv) प्राज्ञैर्मैत्रीम् = ________ + ________

ग. संयोगं कुरुत –

(i) वनम् + परशुना (ii) प्रियम् + अपृष्टम्

(iii) इदम् + कृत्वा (iv) आरोग्यम् + आनृण्यम्

(v) शुभम् + वा

3. **उदाहरणानुसारं लिखत–**

क. उदाहरणम् : **सर्पेण सहितः इति ससर्पः**

(i) दोषेण सहितः इति ________

(ii) तनयेन सहितः इति ________

(iii) ________ इति सरागः

(iv) ________ इति सक्रोधः

(v) शरीरेण सहितः इति ________

ख. उदाहरणम् : **परशुना हतम् इति परशुहतम्**

(i) वाचा क्षतम् इति ________________

(ii) दुष्टेन हतम् इति ________________

(iii) ________________ इति साधुरक्षितम्

(iv) ________________ इति वाक्यरक्षितम्

(v) धनेन हीन. इति ________________

4. अ. उचितपदैः अन्वयं पूरयत–

क सायकैः विद्धं ________ हतं वनं रोहते। वाचा वीभत्स ________ वाक्क्षतम् न ________ ।

ख. इदं ________ मे किन्नु स्यात् **किन्नु** अकुर्वत. मे इति **संचित्य** पुरुषो कुर्यात् या न वा।

ग. स· ________ ससर्प इव रात्रौ सुखं न ________ यः अभ्यन्तरे ________ निर्दोषं जनं कोपयति।

5. अधोलिखितानाम् वाक्यानाम् उदाहरणमनुसृत्य वाच्यपरिवर्तनं कुरुत–

	कर्मवाच्यम्	कर्तृवाच्यम्
यथा	योगेन विद्या रक्ष्यते।	योग· विद्या रक्षति।
(i)	वृत्तेन कुलं रक्ष्यते।	________________
(ii)	________________	सत्यं धर्मं रक्षति।
(iii)	मृजया रूप रक्ष्यते।	________________
(iv)	________________	परशु. वनं हन्ति।

6. अधोलिखितानां पदानां समानार्थकपदानि पाठात् चित्वा लिखत–

यथा बाणैः ________________ सायकै.

क. विद्धम् ________________

ख. चरित्रेण ________________

ग. विचिन्त्य ________________

घ. विदधीत ________________

ङ. अद्यात् ________________

च. प्राज्ञः ________________

छ. निरन्तरम् ________________

7. तत्पदं रेखाङ्कितं कुरुत–

क. यत्र ल्यप् प्रत्ययः नास्ति ————

संचित्य, परीक्ष्य, द्वेष्य, विज्ञाय

ख. यत्र अस्मिन् पाठे द्वितीया विभक्तिः प्रयुक्ता ————

वनम्, विद्वम्, पराभवम्, कुलम्

ग. यत्र विधिलिङ्गः नास्ति ————

चिन्तयेत्, रक्ष्यते, जागृयात्, गच्छेत्।

कविपरिचयः

कौरवाणां मुख्यमंत्री विदुरः महान् नीतिवेत्ता, कुशलराजनीतिज्ञः महापुरुषः च आसीत्। कौरवेभ्यः, पाण्डवेभ्यः च परामर्शं ददन् अयं कदापि सत्यमार्गात् च्युतः न अभवत्। अनेन दत्तम् अप्रियं भाषणम् श्रुत्वा अपि धृतराष्ट्रः अस्मात् विमुखः नाभवत्।

ग्रन्थपरिचयः

विदुरनीतिः इति नाम ग्रन्थः महाभारतस्य उद्योगपर्वणः उद्धृतः अस्ति। अस्मिन् ग्रन्थे नीतिवेत्ताविदुरेण लोकोपयोगी उपदेशः दत्तः यम् अनुसरन् नरः स्वजीवनयात्रायाम् आगताभिः समस्याभिः आत्मानम् उद्धर्तुं शक्नोति।

- जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।
  स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च।।
- सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम्।
  प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः।।
- वृत्तं यत्नेन संरक्षेत्
- सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति।
- वाक्सायकाः वदनान्निष्पतन्ति,

यैराहतः शोचति रात्र्यहनि।
परस्य वै मर्मसु ते पतन्ति,
तान् पण्डितो नावसृजेत् परेषु।।

1. √ रुह् धातोः लट् लकारे 'रोहति' इति एवं प्रयोगः भवति परमत्र श्लोके 'रोहते' इत्येवं प्रयुक्तः एतादृशः प्रयोगः आर्षप्रयोगः।

2. क. **कृ – विधिलिङ्गे रूपाणि**

प्र० पु० कुर्यात्	कुर्याताम्	कुर्यु·
न० पु० कुर्याः	कुर्यातम्	कुर्यात
उ० पु० कुर्याम्	कुर्याव	कुर्याम

ख. **√ ब्रू – विधिलिङ्गे रूपाणि**

प्र० पु० ब्रूयात्	ब्रूयाताम्	ब्रूयुः
न० पु० ब्रूयाः	ब्रूयातम्	ब्रूयात
उ० पु० ब्रूयाम्	ब्रूयाव	ब्रूयाम

ग. **√ जागृ – विधिलिङ्गे रूपाणि**

प्र० पु० जागृयात्	जागृयाताम्	जागृयुः
न० प० जागृयाः	जागृयातम्	जागृयात
उ० पु० जागृयाम्	जागृयाव	जागृयाम

षष्ठः पाठः

स्वामी विवेकानन्दः

(भारतभूमि अनेक विचारकों एवं महापुरुषों की जननी है, यहाँ जन्म लेकर महापुरुषों ने अपने चिन्तनों एवं तदनुरुप कार्यो द्वारा समाज का बहुविध उपकार किया है। ऐसे ही महापुरुषों में स्वामी विवेकानन्द का नाम बड़े आदर से लिया जाता है जिन्होंने भारतीय संस्कृति एवं अध्यात्म की गरिमा का सम्पूर्ण विश्व में गौरव बढ़ाया। उठो जागो और श्रेष्ठतम लक्ष्य को प्राप्त करके जगाओ "**उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत**" से जनमानस को प्रेरणा प्रदान करने वाले स्वामी विवेकानन्द के अनुसार सभी सम्प्रदायों के लोग अपने-अपने धर्मों का पालन करते हुए भी यदि प्राणियो के प्रति समत्वदृष्टि रखें और पूर्वाग्रह से दूषित न हों तो विश्व में कहीं भी साम्प्रदायिक कट्टरता कष्टदायी नहीं होगी।)

अनुपमोऽयमस्माकं भारतदेशः। बहवो महापुरुषाः धर्माचार्याश्च अत्राजायन्त स्वप्रयत्नैश्च समाजे व्याप्तानां कुरीतीनां विनाशं कृतवन्तः। तेष्वन्यतम आसीत् स्वामी विवेकानन्दः येन भारतस्य अध्यात्मगौरवं पाश्चात्यजगति प्रतिष्ठापितम्। विवेकानन्दस्य जन्म कलिकातानगरे जनवरीमासस्य द्वादशतारिकायां 1863 तमे वर्षे अभवत्। अस्य जननी भुवनेश्वरी पिता च विश्वनाथ आसीत्।

नरेन्द्रनामायं बालः शैशवादेव कुशाग्रबुद्धिः स्वभावाच्च चलः मनसोऽपि अशांतः चासीत्। अथ कदाचित् श्रीरामकृष्णपरमहंसानां स्पर्शमात्रेणैव अस्य चेतना जागृता। गच्छता कालेन परमहंसः एव नरेन्द्रस्य आध्यात्मिको गुरुः अभवत्। परतन्त्रभारतस्य दुर्दशां विचार्य परमहंसः देशस्य गौरवप्रतिष्ठार्थं नरेन्द्रमादिदेश। गुरोराज्ञां शिरसि निधाय विवेकानन्दः समग्रेऽपि राष्ट्रे पर्यटनमकरोत्। मोहनिद्राप्रसुप्तान् देशवासिनः यथाशक्ति प्रबोधितवान्।

1893 तमे वर्षे स्वामी विवेकानन्दः अमेरिकाराष्ट्रस्य शिकागो नाम्निनगरे समायोजिते विश्वधर्मसम्मेलने भारतस्य प्रतिनिधित्वमकरोत्। यावदेवासौ अमेरिकावासिनः 'बन्धवो' 'भगिन्यश्चेति' पदाभ्यां सम्बोधितवान् तावदेव समग्रमेव सभाभवनं करतलध्वनिना गु जायमानं जातम्। सप्ताहं यावत् महामेधावी विवेकानन्दः शून्यमवलम्ब्य स्वकीयं सारगर्भितं भाषणं कृतवान्। यस्मात् भारतेन विश्वगुरुपदम् पुनः लब्धम्। स्वज्ञानगरिम्णा समग्रमपि विश्वं वशीकुर्वन् विवेकानन्दः घोषितवान् – सर्वेऽपि जनाः पूर्वाग्रहं विहाय प्राणिषु समत्वदृष्टिम् अवधारयन्तु चेत् तर्हि स्वधर्मविशेषमनुपालयन्तोऽपि विश्वबन्धुत्वं स्थापयितुं शक्नुवन्ति।

यावज्जीवनं मानवसेवाव्रतमाचरन् असौ देशे-देशे, स्थाने-स्थाने च पीडितान् जनान् तुतोष। एतदर्थमेव स महात्मा रामकृष्णसेवासमितेः स्थापनाम् अकरोत्। एतादृशाणां महापुरुषाणां कृते सत्यमेव उक्तम् –

परोपकारैकधियः स्वसुखाय गतस्पृहाः।
जगद्धिताय जायन्ते मानवाः केऽपि भूतले।।

कन्याकुमारीसमीपस्थे समुद्रे निर्मितं विवेकानन्दस्य विश्वस्तरीयं स्मारकमण्डपं वर्तते यत् तस्य महापुरुषस्य राष्ट्रभक्तिं विश्वबन्धुत्वं

सर्वधर्मसमभावं च स्मारयति। उत्तिष्ठत ! जाग्रत ! प्राप्य वरान्निबोधत" इत्यस्ति तस्य महापुरुषस्य सन्देशानां सारांशः।

अनुपमः	–	अतुलनीय.	–	अद्वितीय
अध्यात्मगौरवम्	–	आध्यात्मिक महत्त्वम्	–	आध्यात्मिक महत्त्व को
जगति	–	संसारे	–	ससार में
कुशाग्रबुद्धिः	–	तीक्ष्ण बुद्धि	–	तेज बुद्धि वाला
पदाभ्याम्	–	शब्दाभ्याम्	–	दो शब्दो द्वारा
करतलध्वनिना	–	हरततलस्य शब्देन	–	ताली की आवाज से
गुञ्जायमानं जातम्	–	गुञ्जितम् अभवत्	–	गूंज उठा
स्वज्ञानगरिणा	–	स्वज्ञानस्य गौरवेण	–	अपने ज्ञान के गौरव से
वशीकुर्वन्	–	आत्मसात कुर्वन्	–	अपने अधीन करते हुए
पूर्वाग्रहं	–	पूर्वनिर्धारितविचारम्	–	पहले किए गए हठ को
विहाय	–	त्यक्त्वा	–	छोड़ कर
अवधारयन्तु	–	धारण कुर्वन्तु	–	धारण करें
निबोधत	–	जानीत	–	जानो
स्मारयति	–	स्मरण कारयति	–	याद करवाता है
गतस्पृहाः	–	इच्छारहिताः	–	इच्छाओं से रहित

[illegible]

- भारतभूमि. महापुरुषाणा जन्मभूमिः।
- विवेकानन्दस्य जन्म कलिकातानगरे 1863 तमे वर्षे जनवरीमासस्य द्वादशतारिकायामभवत्।
- अस्य पितरौ भुवनेश्वरीविश्वनाथदत्तौ च आस्ताम्।
- विवेकानन्दः अमेरिकाराष्ट्रस्य शिकागो नगरे 1893 तमे वर्षे विश्वधर्मसम्मेलने भारतस्य प्रतिनिधित्वमकरोत्।
- सः घोषितवान् – संसारस्य सर्वे जनाः पूर्वाग्रहं त्यक्त्वा स्वधर्मस्य पालनं कुर्वन्तः विश्वबन्धुत्व स्थापयन्तु।
- सः श्रीरामकृष्णसेवासमितेः स्थापनां मानवहितायाकरोत्।
- "उत्तिष्ठत ! जाग्रत ! प्राप्य वरान्निबोधत" इति तस्य सन्देशानां सारः अस्ति।
- परोपकारार्थं समर्पितजीवनाः केऽपि विरला एव संसारे जायन्ते।

[illegible]

[illegible]

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकेनैव पदेन वदत–**

    क. अस्माकं भारतदेश. कीदृश. ?

    ख. श्रीरामकृष्णपरमहंसस्य शिष्यः कः आसीत् ?

    ग. नरेन्द्रस्य पितुः नाम किमासीत् ?

    घ. विवेकानन्दस्य चेतना केषां स्पर्शमात्रेणैव जागृता ?

    ङ. अमेरिकाराष्ट्रस्य कस्मिन् नगरे विश्वधर्मसम्मेलनमायोजितमासीत् ?

[illegible]

1. **प्रश्नानामुत्तराणि संस्कृतभाषया लिखत–**

    क. कीदृशोऽयं भारतदेशः ?

    ख. अमेरिकाराष्ट्रस्य शिकागोनगरे विवेकानन्देन अमेरिकावासिनः कथं सम्बोधिताः ?

    ग. विवेकानन्दस्मारकमण्डपं किं स्मारयति ?

    घ. विवेकानन्दस्य सन्देशानां सारः कस्मिन् वाक्ये निहितः अस्ति ?

2. **अधोलिखितेषु वाक्येषु स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत–**

    क. **स्वामीविवेकानन्देन** भारतस्य अध्यात्मगौरवं पाश्चात्यजगति प्रतिष्ठापितम्।

    ख. शैशवावस्थायां नरेन्द्रः **कुशाग्रबुद्धिः** आसीत्।

ग. श्रीरामकृष्णपरमहंसानां स्पर्शमात्रेणैव **विवेकानन्दस्य** चेतना जागृता।

घ. विवेकानन्दः गुरोराज्ञां **शिरसि** अधारयत्।

ङ. स्वामी विवेकानन्दः **मोहनिद्राप्रसुप्तान्** जनान् प्रबोधितवान्।

3. सन्धिम्/सन्धिविच्छेदं कुरुत–

क. यथा– यावत् + एव = यावदेव

(i) शैशवात् + एव = ________

(ii) ________ + ________ = स्वभावाच्च

ख. यथा– ततः + च = ततश्च

(i) स्वप्रयत्नैः + च = ________

(ii) ________ + ________ = भगिन्यश्च

4. उदाहरणमनुसृत्य प्रकृति–प्रत्ययविभागं कुरुत–

क यथा– प्रति + स्था + णिच् + क्त = प्रतिष्ठापितम्

____ + ____ + ____ + ____ = प्रबोधितवान्

ख. यथा– जन् + क्त = जातः

(i) जागृ + क्त = ________

(ii) ____ + मा + ____ = निर्मितम्

5. उदाहरणमनुसृत्य विलोमपदान् लिखत–

यथा – सन्तः – असन्तः

महायोगिन. ________

शिष्यः ________

वार्धक्यात् ________

शान्तः ________

सुखेन ________

मेधावी ________

स्वीकृत्य ________

6. उदाहरणमनुसृत्य अधोलिखितानां विग्रहपदानां समस्तपदानि कुरुत–

	विग्रहपदानि	**समस्तपदानि**
यथा–	स्वज्ञानस्य गरिमा तेन	स्वज्ञानगरिम्णा

सभाया· भवनम् ____________

विश्वस्य गुरुः ____________

विश्वस्य बन्धुत्वम् ____________

पूर्वस्य आग्रहम् ____________

राष्ट्रस्य भक्तिम् ____________

धर्मस्य समभावम् ____________

7. चित्रं दृष्ट्वा प चवाक्येषु संस्कृतभाषया वर्णयत–

स्वामी विवेकानन्दः

(क) **भावपक्ष :** स्वामिविवेकानन्दस्य जन्म कलिकातानगरे जनवरीमासस्य द्वादशतारिकायाम् 1863 तमे वर्षे अभवत्। अस्य माता भुवनेश्वरी पिता च विश्वानाथदत्त आसीत्। श्रीरामकृष्णपरमहंस· अस्य गुरुः आसीत्। सः बाल्यकालादेव समस्याना समाधाने ईदृशानि तथ्यानि प्रस्तौति स्म यदन्ये जना· तत्समक्षं निस्तब्धाः भवन्ति स्म।

एषा महाविभूति· जुलाईमासस्य चतुर्तारिकायाम् 1902 तमे वर्षे पञ्चत्वं गता। यद्यपि अस्य पार्थिवशरीरम् अद्य नास्ति किन्तु अनेन प्रदत्ता· उपदेशा· अस्मान् सर्वदा प्रेरयिष्यन्ति। तस्य सन्देशः आसीत् – "त्वम् शुद्धस्वरुपो भव। उत्तिष्ठत ! जाग्रत ! प्राप्य वरान्निबोधत ! त्वम् आत्मानम् दुर्बलं मन्यसे। भो ! सर्वशक्तिमान्, स्वस्वरूपं प्रकाशयत।

1. 'यत्' प्रत्ययप्रयोगः

चैतन्यम्	–	चेतन	+	यत्
वैदुष्यम्	–	विद्वस्	+	यत्
सौन्दर्यम्	–	सुन्दर	+	यत्
शरण्यः	–	शरण	+	यत्
पाथेयः	–	पथिन्	+	यत्
अतिथेयम्	–	अतिथि	+	यत्

2. अव्ययीभाव समासः।

1	यथाशक्ति	शक्तिम् अनतिक्रम्य	यथार्थे
2.	यथाबलम्	बलम् अनतिक्रम्य	यथार्थे
3	यथाकालम्	कालस्य अनुसारम्	यथार्थे
4.	उपगङ्गम्	गङ्गायाः समीपे	सामीप्यर्थे
5.	उपनदम्	नद्याः समीपे	सामीप्यर्थे
6.	अनुरथम्	रथस्य पश्चात्	पश्चादर्थे
7	निर्मक्षिकम्	मक्षिकाणाम् अभावः	अभावार्थे

अस्मिन् पूर्वपदम् अव्ययं भवत्यपरं च सज्ञा। समासे कृते समस्तपद नपुसकलिंगे एकवचने च भवति।

ठक् प्रत्ययः

धार्मिकः	–	धर्म	+	ठक् (इक्)
व्यावहारिक	–	व्यवहार	+	ठक्
दैनिकः	–	दिन	+	ठक्
वार्षिक	–	वर्ष	+	ठक्
साप्ताहिक	–	सप्ताह	+	ठक्

1. तस्मिन् भवः इत्यर्थे 'ठक्' प्रत्यय प्रयुज्यते।
2. 'ठक्' प्रत्यय 'इक' इति आदेश भवति।

3 ठक् प्रत्यययोजनात् पूर्व धातुषु पदस्य प्रथमः ह्रस्वस्वर. दीर्घः जायते।

अदस् (वह) पुल्लिंग

विभक्तिः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमा	असौ	अमू	अमी
द्वितीया	अमुम्	"	अमून्
तृतीया	अमुना	अमूभ्याम्	अमीभिः
चतुर्थी	अमुष्मै	"	अमीभ्यः
पञ्चमी	अमुष्मात्	"	"
षष्ठी	अमुष्य	अमुयोः	अमीषाम्
सप्तमी	अमुष्मिन्	"	अमीषु

अदस् (वह) पुल्लिंग

विभक्तिः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमा	अदः	अमू	अमूनि
द्वितीया	"	"	"
तृतीया	अमुना	अमूभ्याम्	अमीभिः
चतुर्थी	अमुष्मै	"	अमीभ्य.
पञ्चमी	अमुष्मात्	"	"
षष्ठी	अमुष्य	अमुयो.	अमीषाम्
सप्तमी	अमुष्मिन्	"	अमीषु

अदस् (वह) पुल्लिंग

विभक्तिः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमा	असौ	अमू	अमूः
द्वितीया	अमुम्	"	"
तृतीया	अमुया	अमूभ्याम्	अमीभि·
चतुर्थी	अमुष्यै	"	अमूभ्यः
पञ्चमी	अमुष्याः	"	"
षष्ठी	"	अमुयोः	अमूषाम्
सप्तमी	अमुष्याम्	"	अमूषु

सप्तमः पाठः

(प्रस्तुत पाठ आयुर्वेद के प्रसिद्ध ग्रन्थ 'सुश्रुत संहिता' के चिकित्सास्थान में वर्णित 24वें अध्याय से संकलित है। इसमें आचार्य सुश्रुत ने व्यायाम की परिभाषा बताकर उससे होने वाले शारीरिक सुगठन, विकसित होने वाली कान्ति, स्फूर्ति, नीरोगता तथा जठराग्नि की दीप्तता आदि लाभों की चर्चा की है। व्यायाम कितना किया जाय ? इसका समाधान करते हुए आचार्य सुश्रुत कहते है कि आधी शक्ति से व्यायाम करना सभी के लिए आवश्यक एवं लाभप्रद है।)

शरीरायासजननं कर्म व्यायामसंज्ञितम्।
तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः।।1।।

शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता।
दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा।।2।।

श्रमक्लमपिपासोष्णशीतादीनां सहिष्णुता।
आरोग्यं चापि परमं व्यायामादुपजायते।।3।।

न चास्ति सदृशं तेन किंचित्स्थौल्यापकर्षणम्।
न च व्यायामिनं मर्त्यमर्दयन्त्यरयो बलात्।।4।।

न चैनं सहसाक्रम्य जरा समधिरोहति।
स्थिरीभवति मांसं च व्यायामाभिरतस्य च।।5।।

व्यायामस्विन्नगात्रस्य पद्भ्यामुद्वर्तितस्य च।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः।
वयोरूपगुणैर्हीनमपि कुर्यात्सुदर्शनम्।। 6।।

व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम्।
विदग्धमविदग्धं वा निर्दोषं परिपच्यते।। 7।।

व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम्।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः।। 8।।

सर्वेष्वृतुष्वहरहः पुम्भिरात्महितैषिभिः।
बलस्यार्धेन कर्तव्यो व्यायामो हन्त्यतोऽन्यथा।।9।।

हृदिस्थानास्थितो वायुर्यदा वक्त्रं प्रपद्यते।
व्यायामं कुर्वतो जन्तोस्तद्बलार्धस्य लक्षणम्।।10।।

वयोबलशरीराणि देशकायाशनानि च।
समीक्ष्य कुर्याद्व्यायाममन्यथा रोगमाप्नुयात् ।।11।।

आयासः	–	प्रयत्नः, प्रयासः, श्रमः	–	परिश्रम
विमृन्द्नीयात्	–	मर्दयेत्	–	मालिश करना चाहिए
समन्ततः	–	सर्वप्रकारेण	–	सभी तरह से
उपचयः	–	अभिवृद्धिः, अभ्युदयः	–	वृद्धि, उत्थान
गात्रम्	–	शरीरः	–	शरीर
मृजा	–	स्वच्छीकरणम्	–	स्वच्छ करना
क्लम्	–	श्रमजनितं शैथिल्यम्	–	थकान
पिपासा	–	पातुम् (जलम्) इच्छा	–	प्यास
उष्ण	–	तप्तः	–	गर्म
स्थौल्यम्	–	अतिमांसलत्वम्, पीनता	–	बहुत मोटापा
अपकर्षणम्	–	दूरीकरणम्	–	खीचकर दूर करना, कम करना
अर्दयन्ति	–	अर्दनं कुर्वन्ति	–	कुचल डालते हैं।
अरयः	–	शत्रवः	–	शत्रु, दुश्मन
सहसाक्रम्य	–	अकस्मात् आक्रमणं कृत्वा	–	अकस्मात् हमला करके
जरा	–	वार्धक्यम्	–	बुढापा
स्विन्नगात्रस्य	–	स्वेदेन सिक्तस्य	–	पसीने से लथपथ के
विदग्धम्	–	सुपक्वम्	–	भली प्रकार पके हुए
परिपच्यते	–	जीर्यते	–	पच जाता है।
अहन्	–	दिवसः	–	दिन
पुम्भिः	–	पुरुषैः	–	पुरुषों के द्वारा
वक्त्रं	–	मुखं	–	मुँह
अशनानि	–	आहाराः/भोजनानि	–	भोजन
सुविभक्तता	–	शारीरिकम् सुगठनम्	–	शारीरिक सुगठन
वैनतेयः	–	गरुडः	–	गरुड़
उरगः	–	सर्पः	–	साँप

शरीरायासजननं कर्म व्यायाम इति कथ्यते।

व्यायामेन स्वास्थ्यवृद्धि सौन्दर्यवृद्धि, स्फूर्ति., अङ्गाना सुगठनम्, जठराग्ने दीपन, आलस्यहीनता च भवति।

व्यायामात् आरोग्य जायते, सहिष्णुता वर्धते, पीनत्वं हीयते।

अर्धशक्त्या एव व्यायाम. कुर्यात्। एतद्विपरीतं हानिकर भवति।

नियमितरूपेण व्यायाम कुर्वन् जन असमये वार्धक्यं न प्राप्नोति।

व्यायामिन पुरुष व्याधयः तथैव नायान्ति यथा वैनतेयस्य समीपम् सर्पाः नायान्ति।

i. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकेनैव पदेन वदत–**

क. शरीरायासजननं कर्म किम् उक्तम् ?

ख. व्यायाम सदा कि कथ्यते ?

ग. स्थौल्यस्य अपकर्षणं कथं भवति ?

घ. कियत् बलेन व्यायाम कर्त्तव्य ?

ङ. के व्यायामिनं पुरुष न अर्दयन्ति ?

. **अधोलिखितानाम् प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत–**

क. व्याधयः कस्य सकाशं न उपसर्पन्ति ?

ख. परमम् आरोग्य कथम् उपजायते ?

ग. जरा कस्य सकाश सहसा न समधिरोहति ?

घ. पाठेऽस्मिन् उरगस्य तुलना केन सह कृता वैनतेयस्य च केन सह ?

ङ. व्यायामः कीदृशं जनं सुदर्शनं कुरुते ?

च. आत्महितैषिभि. कदा किम् कर्त्तव्यम् ?

2. उदाहरणमनुसृत्य यथास्थानाम् रिक्तस्थानानि पूरयत–

यथा–	पातुम्	इच्छा	पिपासा
	कर्त्तुम्	इच्छा	चिकीर्षा
क.	————	————	जिगमिषा
ख.	————	————	जिजीविषा
ग.	भोक्तुम्	इच्छा	————
घ.	————	————	पिपठिषा
ङ.	ज्ञातुम्	इच्छा	————
च.	————	————	तितीर्षा

3. स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत–

क. **शरीरस्य** आयासजननं कर्म व्यायामः इति कथ्यते।
ख. **व्यायामात्** परमम् आरोग्यम् उपजायते।
ग. **बलस्यार्धेन** व्यायामः कर्त्तव्यः।
घ. **गात्राणां** सुविभक्तता व्यायामेन संभवति।
ङ. **अरयः** व्यायामिनं न अर्दयन्ति।
च. **व्यायामशालिनं** जन व्याधयः न उपसर्पन्ति।

4. व्यायामेन के – के लाभाः सन्ति ? चतुर्षु वाक्येषु लिखत–

5. निम्नलिखितानाम् अव्ययानाम् प्रयोगं रिक्तस्थानेषु कुरुत–

सहसा, समन्ततः, अपि सदृशं, सर्वदा, यदा, सदा

क. ———— व्यायामं कर्त्तव्यम् ।
ख ———— मनुष्यः सम्यक्रूपेण व्यायाम करोति, सः ———— स्वस्थः तिष्ठति।
ग. असुन्दराः ———— सुन्दराः भवन्ति।
घ. व्यायामेन ———— किञ्चित् स्थाल्यापकर्षणं नास्ति।
ङ. नापित ———— शरीर मर्दयति।
च. व्यायामिनं जनस्य सकाशम् ———— वार्धक्यम् न आयाति।

6. क. **समस्तपदानि / विग्रहं लिखत।**

क.	शरीरस्य आयासः	————
ख.	————	शरीरोपचयः
ग.	स्थौल्यस्य अपकर्षणम्	————
घ.	————	व्यायामनिरताः

ख. उदाहरणमनुसृत्य अधोलिखितेभ्यः पदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत।
यथा –

	सुदर्शनम्	सु + दर्शनम्
क.	उपजायते	______ + ______
ख.	अपकर्षणम्	______ + ______
ग.	अधिरोहति	______ + ______
घ.	प्रपद्यते	______ + ______
ङ.	सुविभक्तता	______ + ______

7. उदाहरणमनुसृत्य तरप् – तमप् प्रत्यययोगेन पदरचनां कुरुत।

		तरप्	तमप्
उदाहरणम्	उच्चः	उच्चतरः	उच्चतमः
क.	पथ्य	______	______
ख.	अधिकः	______	______
ग	गुरु	______	______
घ.	शीघ्रम्	______	______
ङ.	अल्पम्	______	______
च.	तीव्रम्	______	______
छ.	कुशलः	______	______
ज	बलवत्	______	______

क सुश्रुतः आयुर्वेदस्य 'सुश्रुतसंहिता' इत्याख्यस्य ग्रन्थस्य रचयिता। अस्मिन् ग्रन्थे शल्यचिकित्सायाः प्राधान्यमस्ति। सुश्रुतः शल्यशास्त्रज्ञस्य दिवोदासस्य शिष्य आसीत्। दिवोदासः सुश्रुतं वाराणस्या आयुर्वेदमपाठयत्। सुश्रुतः दिवोदासस्योपदेशान् स्वग्रन्थेऽलिखत्।

ख उपलब्धासु आयुर्वेदीयसंहितासु सुश्रुतसंहिता सर्वश्रेष्ठः शल्यचिकित्साप्रधानो ग्रन्थः। अस्मिन् ग्रन्थे 120 अध्यायेषु क्रमेण सूत्रस्थाने मौलिकसिद्धान्तानां शल्यकर्मोपयोगियन्त्रादीनां, निदान स्थाने प्रमुखानां रोगाणां, शरीरस्थाने शरीरशास्त्रस्य चिकित्सास्थाने, शल्यचिकित्सायाः कल्पस्थाने च विषाणां प्रकरणानि वर्णितानि। अस्योत्तरतन्त्रे 66 अध्यायाः सन्ति।

(i) **शरीरमाद्यं खलु धर्मसाधनम्।**

(ii) **लाघवं कर्मसामर्थ्यं स्थैर्यं क्लेशसहिष्णुता।**
दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते।।

(iii) यथा शरीरस्य रक्षायै उचितं भोजनम्, उचितश्च व्यवहारः आवश्यकोऽस्ति तथैव शरीरस्य स्वास्थ्याय व्यायामः अपि अत्यावश्यकः।

(iv) पक्षिणः आकाशे उड्डीयन्ते तेषां उड्डयनमेव तेषां व्यायामः। पशवोऽपि इतस्ततः पलायन्ते, पलायनमेव तेषां व्यायामः। शैशवे शिशुः स्वहस्तपादौ चालयति, अयमेव तस्य व्यायामः। व्यायामेन शरीरस्य अङ्गाना विकासो भवति। मनुष्यैः सुखपूर्वकं जीवनं यापयितुं नित्यं व्यायामः करणीयः।

व्यायामः (पु) = वि + आ + यम् + घञ् = पौरुष

अष्टमः पाठः

(प्रस्तुत पाठ महाकवि भास-विरचित पञ्चरात्र नामक नाटक के द्वितीय अङ्क से सम्पादित कर उद्धृत है। दुर्योधनादि कौरव वीरों द्वारा आक्रमण करके राजा विराट की गायों का हरण कर लिया जाता है। विराट पुत्र उत्तर बृहन्नला को सारथी बनाकर कौरव सेना का सामना करने जाते हैं। कौरवों की तरफ से अभिमन्यु भी लड़ रहा होता है। इसी बीच पुत्र की सहायता के लिए उद्यत महाराज विराट को दूत से सूचना मिलती है कि भीष्म आदि महारथी युद्ध में परास्त हो गए हैं। केवल अभिमन्यु हीं लड रहा है। कुछ समय बाद दूत पुनः सूचना देता है कि पाकशाला के रसोइये बल्लभ द्वारा अभिमन्यु पकड़ लिया गया है। यह सुन कर राजा विराट अत्यन्त प्रसन्न होकर अभिमन्यु को आदर पूर्वक अपने समक्ष उपस्थित करने का आदेश देते हैं। इस पाठ में अभिमन्यु के साथ छद्मवेशी भीम तथा अर्जुन के साथ हुए वार्तालाप का वर्णन है।)

भटः – जयतु महराजः।

राजा – अपूर्व इव ते हर्षो ब्रूहि केन विस्मितः असि ?

भटः – अश्रद्धेयं प्रियं प्राप्तं सौभद्रो ग्रहणं गतः।

राजा – कथमिदानीं गृहीतः ?

भटः – रथमासाद्य निश्शङ्कं बाहुभ्यामवतारितः।

राजा – केन ?

भटः – यः किलैष नरेन्द्रेण महानसे विनियुक्तः, तेन

बृहन्नला – (अपवार्य) एवम् ! आर्यभीमेन परिष्वक्तः, न तु गृहीतः।

राजा – तेन हि सत्कृत्य प्रवेश्यतामभिमन्युः। अथ केनायं प्रवेशयितव्यः ?

भगवान् – बृहन्नलया प्रवेशयितव्यः।

राजा – बृहन्नले ! प्रवेश्यतामभिमन्युः।

बृहन्नला – यदाज्ञापयति महाराजः। (आत्मगतम्) चिरस्य खल्वाकांक्षितोऽयं नियोगः लब्धः। (निष्क्रान्ता)

(ततः प्रविशति भीमः अभिमन्युना सह)

भीमसेनः – (स्वगतम्)

आदीपिते जतुगृहे स्वभुजावसक्ता,
मद्भ्रातरश्च जननी च मयोपनीताः।

सौभद्रमेकमवतार्य रथात्तु बालम्,
तं च श्रमं प्रथममद्य समं हि मन्ये।।
(प्रकाशम्) इतः इतः कुमार।

अभिमन्युः – भोः को नु खल्वेषः ? येन भुजैकनियन्त्रितो बलाधिकेनापि न पीडितः अस्मि।

बृहन्नला – इत इतः कुमारः।

अभिमन्युः – अये ! अयमपरः कः ?
अयुज्यमानैः प्रमदाविभूषणैः, करेणुशोभाभिरिवार्पितो गजः।
लघुश्च वेषेण महानिवौजसा, विभात्युमावेषमिवाश्रितो हरः।।

बृहन्नला – (अपवार्य) इममिहानयता किमिदानीमार्येण कृतम् ? प्रथमे युद्धे एव अभिमन्युः पराजयतां नीतः। नैतत् शोभनम्। पूर्वमेव पतिवियुक्ता सुभद्रा पुत्रवियुक्तापि कृता। अभिमन्युं प्रति वासुदेवोऽपि रुष्यति ? एवं स्वात्मभुजबलमेव त्वया दूषितः।

भीमसेनः – अर्जुन !

बृहन्नला – अथ किम् अथ किम् अर्जुनपुत्रोऽयम्।

भीमसेनः – (अपवार्य) जानामि यत् इममिहानयता नोचितं कृतं परं किं स्वपुत्रं शत्रुहस्ते त्यक्तुं युज्यते। अपि च दुःखे मग्ना द्रौपदी एनं पश्यतु। इति विचिन्त्य एवाहृतः अयम्।

बृहन्नला – आर्य, अभिभाषणकौतूहलं मे महत्। वाचालयत्वेनमार्य।

भीमसेनः – (अपवार्य) बाढम्, (प्रकाशम्) अभिमन्यो !

अभिमन्युः – अभिमन्युर्नाम

भीमसेनः – रुष्यत्येष मया त्वमेवैनमभिभाषय।

बृहन्नला – अभिमन्यो !

अभिमन्युः – कथं कथम् ! अभिमन्युर्नामाहम् ! भोः ! किमत्र विराटनगरे क्षत्रियवंशोद्भूताः नीचैः अपि नामभिः अभिभाष्यन्ते अथवा अहं शत्रुवशं गतः अत एव तिरस्क्रियते।

बृहन्नला – अभिमन्यो ! सुखमास्ते ते जननी ?

अभिमन्युः – कथं कथम् ? जननी नाम ? किं भवान् मे पिता अथवा पितृव्यः? कथं मां पितृवदाक्रम्य स्त्रीगतां कथां पृच्छसे ?

बृहन्नला – अभिमन्यो ! अपि कुशली देवकीपुत्रः केशवः ?

अभिमन्युः – कथं कथम् ? तत्रभवन्तमपि नाम्ना ! अथ किम् अथ किम्? कुशली भवतः संसृष्टः।

(उभौ परस्परमवलोकयतः)

अभिमन्युः – कथमिदानीं सावज्ञमिव मां हस्यते ?

बृहन्नला – न खलु किञ्चित्।

पार्थ ! पितरमुद्दिश्य मातुलं च जनार्दनम्।
तरुणस्य कृतास्त्रस्य युक्तो युद्धपराजयः।।

अभिमन्युः – अलं स्वच्छन्दप्रलापेन ! अस्माकं कुले आत्मस्तवंकर्तुमनुचितम्! रणभूमौ हतेषु शरान् पश्य मदृते अन्यत् नाम न भविष्यति।

बृहन्नला – एवं वाक्यशौण्डीर्यम् ! किमर्थं तेन पदातिना गृहीतः ?

अभिमन्युः – अशस्त्रः मामभिगतः। पितरम् अर्जुनं स्मरन् अहं कथं हन्याम्। अशस्त्रेषु मादृशाः न प्रहरन्ति अतः अशस्त्रोऽयं माम् व चयित्वा गृहीतवान्।

भीमसेनः – (आत्मगतम्)

धन्यः खल्वर्जुनो येन प्रत्यक्षमुभयं श्रुतम्।
पुत्रस्य च पितुःश्लाघ्यं संग्रामेषु पराक्रमः ।।

अश्रद्धेयम्	– न श्रद्धेयम्	– श्रद्धा के अयोग्य
सौभद्रः	– सुभद्रायाः पुत्रः अभिमन्युः	– सुभद्रा का पुत्र अर्थात् अभिमन्यु
आसाद्य	– प्राप्य	– पहुँच कर

निःशङ्कम्	– शङ्कया रहितम्	– बिना किसी हिचक के
विनियुक्तः	– अधिकृतः	– जिसे विशेष रूप में नियुक्त किया गया है।
महानसे	– पाकशालायाम्	– रसोई मे
परिष्वक्तः	– आलिङ्गितः	– जिसका आलिङ्गन किया गया है।
सत्कृत्य	– सत्कारं कृत्वा	– सत्कार करके
चिरस्य खलु	– सुचिरप्रतीक्षित.	– अत्यत चिरकाल से जिसकी प्रतीक्षा की जा रही हो।
नियोगः	– आज्ञा	– आदेश
लब्धः	– प्राप्तः	– प्राप्त किया।
जतु	– लाक्षा	– लाख
आदीपिते	– अग्निना प्रदीप्ते	– आग से जलने पर
उपनीताः	– स्थानान्तरं प्रापिताः	– दूसरे स्थान पर पहुँचाए गए।
भुजैकनियंत्रितः	– एकेनैव बाहुना संयत.	– एक ही हाथ से पकडा हुआ (पकड कर लाया हुआ)।
प्रमदा	– स्त्री	– स्त्री
विभूषणैः	– अलङ्करणैः	– गहनों से
करेणुः	– हस्तिनी	– हथिनी
विभाति	– शोभते	– शोभित होता है।
वियुक्ता	– पृथक्भूता	– अलग हुई।
रुष्यति	– क्रुद्धः भवति	– क्रुद्ध होता है।
दूषितः	– भ्रष्टः, विकृतः, दोषयुक्त.	– दोषयुक्त
वाचालयतु	– वक्तुं प्रेरयतु	– बोलने को प्रेरित करे।
पितृव्यः	– पितुः भ्राता	– चाचा
संसृष्टः	– सम्बन्धी	– सम्बन्धी
अवलोकयतः	– पश्यतः	– देखते है
ऋते	– विना	– बिना
वाक्शौण्डीर्यम्	– वाचनिकं वीरत्वम्	– वाचनिक वीरता।
पदातिः	– पद्भ्याम् अतति	– पैदल चलने वाला

- भटः प्रविश्य महानसे विनियुक्तेन सूदेन अभिमन्योः हरणवार्ताम् राज्ञे विज्ञापयति।
- बृहन्नला भीमसेनश्च अभिमन्युमधिकृत्य वार्तालापं कुरुतः।
- अभिमन्युना सह वक्तुकामा बृहन्नला तस्य मातुः सुभद्रायाः कृष्णस्य च कुशलं पृच्छति।
- स्वापहरणात् क्रुद्धः अभिमन्युः बृहन्नलाभीमसेनाभ्यां सह वार्ता कर्तुं नेच्छति।

1. एकेनैव पदेन उत्तराणि वदत–

क. अस्मिन् नाट्यांशे भटेन कस्य हरणं ज्ञापितम् ?

ख. अभिमन्युः केन गृहीतः ?

ग बृहन्नलायाः वेशे वस्तुतः कः आसीत् ?

घ प्रथमे युद्धे एव कः पराजयतां नीतः ?

ङ. अभिमन्योः कुले किं कर्तुम् अनुचितम् आसीत् ?

1. संस्कृतभाषया उत्तराणि लिखत–

क. अभिमन्युः कथं गृहीतः आसीत् ?

ख बृहन्नला भीमसेनम् अभिमन्युं वाचालयितुं किमर्थं कथयति ?

ग भीमसेनः अर्जुनं किमर्थं धन्यं मन्यते ?

घ. भीमसेनः किं विचार्य अभिमन्युं गृहीतवान् ?

ङ. अभिमन्युः आत्मानं कथं तिरस्कृतमिव अनुभवति ?

2. स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत–

क. अभिमन्युः **बृहन्नलया** प्रवेशयितव्यः।

ख. भीमः **अभिमन्युना** सह प्रविशति।

ग **उभौ** परस्परमवलोकयतः।

घ. **अभिमन्युः** पदातिना गृहीतः।

ङ अभिभाषणकौतूहलं मे महत्।

3. **अधोलिखितवाक्येषु प्रकटितभावं चिनुत–**

1. भोः ! को नु खल्वेष ? येन भुजैकनियन्त्रितो बलाधिकेनापि न पीडितः अस्मि।
(विस्मयः, हर्षः, जिज्ञासा)
2. इममिहानयता किमिदानीमार्येण कृतम् ?
(क्रोधः, नैराश्यम्, क्षोभः)
3. अभिमन्युर्नामाऽहम्
(आत्मप्रशंसा, स्वाभिमानः, दैन्यम्)
4. कथ मां पितृवदाक्रम्य स्त्रीगता कथां पृच्छसे ?
(लज्जा, क्रोधः, प्रसन्नता)

4. **म जूषातः अव्ययपदानि विचित्य अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत–**

क. भीमः अभिमन्युना ———— प्रविशति।
ख. ———— केनायं प्रवेशयितव्यः।
ग. पूर्वमेव पतिवियुक्ता सुभद्रा पतिवियुक्ता ———— कृता।
घ. प्रथमे युद्धे ———— अभिमन्युः पराजयता नीत।
ङ. भोः को नु ———— एषः।
च. अपूर्वः ———— ते हर्षो ब्रूहि केन विस्मितः असि ?

इव,	एव,	खलु
सह,	अथ,	अपि

5. **उदाहरणमनुसृत्य कोष्ठकेषु दत्तेषु शब्देषु उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत–**

उदाहरण – भीमः – सह प्रविशति। (अभिमन्यु)
भीमः **अभिमन्युना** सह प्रविशति।

क. ———— सह सीता अपि वनम् अगच्छत्। (राम)
ख. पुत्रः अपि ———— साकम् आपणं गच्छति। (पितृ)
ग. ———— समम् राधा अपि भोजन पचति (लता)
घ. सः ———— प्रति गच्छति। (विद्यालय)
ङ. अहम् ———— प्रति गच्छामि। (गृह)

6. **उदाहणमनुसृत्य पदपरिचयं कुरुत–**

क.	त्यक्तुम्	–	त्यज् + तुमुन्।
	पठितुम्	–	________ + ________
	गन्तुम्	–	________ + ________
ख	समासाद्य	–	सम् + आ + सद् + णिच् + ल्यप्
	आदाय	–	________ + ________ + ________
	सम्पूज्य	–	________ + ________ + ________
ग.	विस्मितः	–	वि + स्मि + क्त
	पूजितः	–	________ + ________
	कृत.	–	________ + ________

अष्टमः पाठः

(प्रस्तुत पाठ महाकवि भास-विरचित पञ्चरात्रम् नामक नाटक के द्वितीय अङ्क से सम्पादित कर उद्धृत है। इसमें पिछले नाट्यांश के आगे की घटना का वर्णन है।

राजा विराट बृहन्नला से अभिमन्यु को उनके समक्ष शीघ्रता से लाने का निर्देश देते हैं। महाराज विराट को अपना नरेश न मानते हुए अभिमन्यु उन्हें प्रणाम नहीं करता है किन्तु पास में खड़े ब्राह्मणवेशधारी युधिष्ठिर को प्रणाम करता है। युधिष्ठिर अभिमन्यु को आशीर्वाद देते हैं। महाराज विराट अभिमन्यु के व्यवहार से किंचित् क्षुब्ध होकर उसके गर्व को अपनी आक्षेप भरी वाणी से शमन करने की चेष्टा करते हैं। इसी क्रम में भीमसेन से वीरतापूर्ण वाणी को सुनकर अभिमन्यु उनसे पूछता है कि आप कौन हैं ? जो मेरे मध्यम तात के समान वचन बोल रहे हैं। महाराज विराट द्वारा मध्यम तात के विषय में पूछने पर अभिमन्यु कहता है कि जिन्होंने जरासन्ध का वध किया है वही मेरे मध्यम तात हैं। इसी बीच राजकुमार उत्तर का प्रवेश होता है जिसके द्वारा सभी को अर्जुन, भीम और युधिष्ठिर का भेद ज्ञात हो जाता है। अपने पितृचरणों को सम्मुख देख अभिमन्यु अत्यधिक प्रसन्न होता है और तुरन्त उन्हें प्रणाम करता है।)

राजा – त्वर्यतां त्वर्यतामभिमन्युः।

बृहन्नला – इत इतः कुमारः एष महाराजः। उपसर्पतु कुमारः।

अभिमन्युः – आः ! कस्य महाराजः ?

बृहन्नला — न, न ब्राह्मणेन सहास्ते।
अभिमन्युः — ब्राह्मणेनेति ? (उपगम्य) भगवन् ! अभिवादये।
भगवान् — एह्येहि वत्स।
शौण्डीर्यं धृतिविनयं दयां स्वपक्षे माधुर्यं धनुषि जयं पराक्रमं च।
एकस्मिन् पितरि गुणानवाप्नुहि त्वं शेषाणां यदपि रोचते चतुर्णाम्।।1।।
अभिमन्युः — अनुगृहीतोऽस्मि।
राजा — एह्येहि पुत्र ! कथं न मामभिवादयसि ? अहो ! उत्सिक्तः खल्वयं क्षत्रियकुमारः। अहमस्य दर्पप्रशमनं करोमि। अथ केनायं गृहीतः ?
भीमसेनः — महाराज ! मया।
अभिमन्युः — अशस्त्रेणेत्यभिधीयताम्।
भीमसेनः — शान्तं पापम् ! धनुस्तु दुर्बलैः एव गृह्यते मम तु भुजौ एव प्रहरणम्।
अभिमन्युः — मा तावद्भोः ! किं भवान् मध्यमः तातः यः तस्य सदृशं वचः वदति।
भगवान् — पुत्र कोऽयं मध्यमो नाम ?
अभिमन्यु — श्रूयताम् ! अथवा नन्वनुत्तरा वयं ब्राह्मणेषु। साध्वन्यो ब्रूयात्।
राजा — भवतु ! भवतु ! मद्वचनात् पुत्र ! कोऽयं मध्यमो नाम ?
अभिमन्युः — योक्त्रयित्वा जरासन्धं कण्ठश्लिष्टेन बाहुना।
असह्यं कर्म तत् कृत्वा नीतः कृष्णोऽतदर्हताम्।।2।।
राजा — न ते क्षेपेण रुष्यामि, रुष्यता भवता रमे।
किमुक्त्वा नापराद्धोऽहं, कथं तिष्ठति यात्विति।।3।।
अभिमन्युः — यद्यहमनुग्राह्यः —
पादयोः समुदाचारः, क्रियतां निग्रहोचितः।
बाहुभ्यामाहृतं भीमः, बाहुभ्यामेव नेष्यति।।4।।
(ततः प्रविशत्युत्तरः)
उत्तरः — तात ! अभिवादये।

राजा — आयुष्मान् भव पुत्र ! पूजिताः कृतकर्माणो योधपुरुषाः।
उत्तरः — पूज्यतमस्य क्रियतां पूजा।

राजा — पुत्र ! कस्मै ?
उत्तरः — इहात्रभवते धनञ्जयाय।
राजा — कथं धनञ्जयायेति।
उत्तरः — अथ किम्
श्मशानद्धनुरादाय तूणी चाक्षयसायके।
नृपा भीष्मादयो भग्ना वयं च परिरक्षिताः।।5।।
राजा — एवमेतत्
उत्तरः — व्यपनयतु भवाञ्छङ्काम्। अयमेव अस्ति धनुर्धरः धनञ्जयः।

बृहन्नला – यद्यहं अर्जुनः तर्हि अयं भीमसेनः अयं च राजा युधिष्ठिरः।

अभिमन्युः – इहात्रभवन्तो मे पितरः। तेन खलु

न रुष्यन्ति मया क्षिप्ता हसन्तश्च क्षिपन्ति माम्।
दिष्ट्या गोग्रहणं स्वन्तं पितरो येन दर्शिताः।।6।।

(भीमसेनमुद्दिश्य) भोस्तात !

अज्ञानात्तु मया पूर्वं यद्भवान् नाभिवादितः!
तस्य पुत्रापराधस्य प्रसादं कर्तुमर्हसि।।7।।

(इति क्रमेण सर्वान् प्रणमति, सर्वे च तम् आलिङ्गन्ति)

श्लाघ्यम्	– प्रशंसायोग्यम्	– प्रशंसा योग्य
त्वर्यताम्	– शीघ्रतां करोतु	– शीघ्रता करें
उत्सिक्तः	– गर्वोद्धतः	– गर्व से उद्धत
दर्पप्रशमनं	– गर्वस्य शमनम्	– गर्व का शमन करना।
प्रहरणम्	– शस्त्रम्	– हथियार
योक्त्रयित्वा	– बद्ध्वा	– बाँधकर
क्षेपेण	– निन्दावचनेन	– निन्दा से
रमे	– प्रीतो भवामि	– प्रसन्न होता हूँ।
व्यपनयतु	– दूरीकरोतु	– दूर करें
आप्नुहि	– प्राप्नुहि	– प्राप्त करो / करें
तूणी	– तूणीरम्	– तरकस
क्षिप्ता	– आक्षेपिता	– आक्षेप किए जाने पर
दिष्ट्या	– भाग्येन	– भाग्य से
गोग्रहणम्	– धेनूनामपहरणम्	– गायों का अपहरण

- राजसभायां प्रवेशानन्तर राज्ञा सह अभिमन्यो. वार्तालाप. भवति।
- भीमसेनेन बृहन्नलया च पृष्टः अभिमन्युः रोषवशात् सम्यक् उत्तर न ददाति।
- अभिमन्यु वार वारं स्वपितृव्यानां शौर्यस्य व्याख्यानं करोति।
- येन बाहुभ्या बध्वा जरासन्ध. हतः स एव मध्यम. तात।
- अह अत्र बाहुभ्याम् आनीत., मम तात भीमः माम् इतः बाहुभ्याम् नेष्यति।
- बृहन्नलावेषधरेण अर्जुनेनैव श्मशानाद्धनुरादाय भीष्मादयो नृपाः पराजिताः वय च रक्षिता।
- गोग्रहण भाग्येन सञ्जात येन स्वपितृन् दृष्टवानहम्।

1. **एकेनैव पदेन उत्तराणि वदत–**
   - क. बृहन्नलायाः वेशे वस्तुतः क· आसीत् ?
   - ख. कस्य भुजौ एव प्रहरणम् ?
   - ग. भीमसेनः जरासन्धं केन बद्धवान् ?
   - घ. चतुर्णां पितृणां कति गुणः वर्णिताः ?

1. **संस्कृतभाषया पूर्णवाक्येन उत्तराणि लिखत–**
   - क. के पूजिताः ?
   - ख. उत्तरः कः आसीत् ?
   - ग. अभिमन्युः कस्य शौर्यस्य व्याख्यानं करोति ?
   - घ. स्वरहस्यप्रकटिते सति बृहन्नलया किमुक्तम् ?
   - ङ. अयमेव अस्ति धनुर्धरः धनञ्जयः इति क. उक्तवान् ?
2. **स्थूलापदमाधृत्य प्रश्ननिर्माणं कुरुत–**
   - क. उत्सिक्तः खलु **अयं क्षत्रियकुमारः**।
   - ख. नन्वनुत्तरा वयं **ब्राह्मणेषु**।

ग. धनु. दुर्बलैः गृह्यते।

घ. इहात्रभवन्तो मे पितर.।

ङ पूज्यतमस्य क्रियतां पूजा।

3. **अधोलिखितवाक्येषु प्रकटितभावं चिनुत–**

1. पादयोः समुदाचारः क्रियतां निग्रहोचितः।
   (शोकः, हर्षः, आत्मविश्वासः)
2. बाहुभ्यामाहृतं, भीमः बाहुभ्यामेव नेष्यति।
   (दृढविश्वासः, उत्साहः, निराशा)
3. धनुस्तु दुर्बलैः एव गृह्यते, मम तु भुजौ एव प्रहरणम्।
   (शौर्य. वाक्सयमः, उत्साह.)
4. दिष्ट्या गोग्रहणं स्वन्त पितरो येन दर्शिता.।
   (धृति., क्षमा, हर्ष.)

4. **उदाहरणमनुसृत्य वाच्यपरिवर्तनं कुरुत–**

उदाहरण	येन पितरः दर्शिता.	यः पितॄन् दर्शितवान्।
क	केन अय गृहीतः ?	______________
ख	पूज्यतमस्य क्रियतां पूजा।	______________
ग	भवद्भि. वयं परिरक्षिताः।	______________
घ.	भवान् शंकां व्यपनयतु।	______________
ङ	वय ब्राह्मणेषु अनुत्तराः जाताः।	______________

5. **उदाहरणनुसारं कोष्ठकप्रदत्तशब्देन सह समुचिताम् – उपपदविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत–**

उदाहरण – किं **भवते** पितॄणां गुणाः रोचन्ते ? (भवत्)

क ________ मोदकाः अतीव रोचन्ते। (अस्मद्)

ख ________ सह सः विराजते। (ब्राह्मण)

ग. भवान् कथ न ________ अभिवादयति ? (अस्मद्)

घ. पिता ________ विश्वसिति (पुत्र)

ङ ________ पूजा अनिवार्या ? (किम् पुल्लिङ्ग)

च अह ________ न अपराद्धः। (युष्मद्)

K

कविपरिचयः

संस्कृतनाटककारेषु महाकवेः भासस्य नाम अग्रगण्यम् अस्ति। अस्य नाटकानाम् प्रकाशनम् सर्वप्रथमं विशेषानुसन्धानेन 1902 तमे वर्षे टी गणपतिशास्त्रिणा एव कृतम्। अस्य कवेः त्रयोदशनाटकानि सन्ति येषां नामानि –

दूतवाक्यम्, कर्णभारम्, दूतघटोत्कचम्, उरुभङ्गम्, मध्यमव्यायोगः, पञ्चरात्रम्, अभिषेकनाटकम्, बालचरितम्, अविमारकम्, प्रतिमानाटकम्, प्रतिज्ञायौगन्धरायणम्, स्वप्नवासवदत्तम्, चारुदत्तम् च सन्ति।

ग्रन्थपरिचयः

अयं नाट्यांशः महाकविभासविरचितात् 'पञ्चरात्रम्' इति नाम नाटकात् गृहीतः। महाभारतस्य विराटपर्वे पाण्डवानाम् अज्ञातवाससमये दुर्योधनः एकं यज्ञं करोति। यज्ञस्य समाप्त्यनन्तरं दुर्योधनः आचार्यद्रोणाय गुरुदक्षिणां दातुमिच्छति। गुरुः पाण्डवानां राज्याधिकारं गुरुदक्षिणारूपेण इच्छति। अनेन क्रोधितः शकुनिः विरोधं करोति। अस्मिन् प्रसङ्गे दुर्योधनः कथयति यदि गुरुद्रोणः पाण्डवानाम् अज्ञातवासं पञ्चरात्रिषु प्रकटयन्तु तर्हि तेषां दायाद्यं दातुं शक्यते। अत एव अस्य नाटकस्य नाम 'पञ्चरात्रम्' इत्यस्ति।

अस्मिन् नाटके स्वकीये यज्ञे विराटराज्ञः अनुपस्थितिकारणात् रुष्टः दुर्योधनः तस्य गोधनं हर्तुं विराटनगरम् आक्रामति तत्र अभिमन्युः अपि कौरवपक्षात् युद्धक्षेत्रं गच्छति यत्र भीमसेनः छद्मवेषेण अभिमन्योः हरणं करोति।

क. अतदर्हताम् – जरासन्धवध – अनर्हत्वम् (dreadful dead) जरासंधं हत्वा भीमेन श्रीकृष्णाय शत्रुवधस्य अवसरः नैव प्रदत्तः

ख. जरासन्धः – कृष्णः जरासंधस्य जामातुः कंसस्य बधमकरोत् येन जरासंधस्य पुत्रीवैधव्यं प्रापिता। अनेन क्रुद्धः जरासन्धः सर्वेषां यदुवंशीयानां विनाशस्य प्रतिज्ञां कृतवान्। एतदर्थम् सः वारंवारम् मथुरायाम् आक्रमणमकरोत् कृष्णम् च अष्टादशवारं गृहीतवान् परं यथाकथञ्चित् कृष्णः ततः पलायितः। अस्मिन्नाटके भीमसेनः कथयति यत् धनुः दुर्बलैः गृह्यते मम तु भुजौ एवं प्रहरणम् एतादृशः एव भावः अन्येषु अपि नाटकेषु दृश्यते। तद्यथा –

(i) अयं तु दक्षिणो बाहुरायुधं सदृश मम – मध्यमव्यायोग.
(ii) भीमस्यानुकरिष्यामि शस्त्रं बाहुर्भविष्यति। मृच्छ
(iii) वयमपि च भुजायुद्धप्रधाना। अवि

ग. महाभारतानुसार भीमस्य जन्म युधिष्ठिरानन्तरम् अभवत्। तत्र अर्जुनः एव मध्यमः मन्यते परं महाकवि. भासः भीमम् एव मध्यमपाण्डवं स्वीकरोति।

(i) 'अलम्' इतिनिषेधार्थे तृतीयाविभक्तिः प्रयुज्यते।
(ii) पर्याप्ते अर्थे च चतुर्थी विभक्तिः।

यथा– अलम् स्वच्छन्दप्रलापेन।
अलम् विवादेन।
अलम् प्रमादेन।
अलम् कोलाहलेन।

अत्र 'अलम्' इतिशब्दस्य योगे तृतीया विभक्तिः प्रयुक्ता।

अलम् भीमः **दुर्योधनाय** अलम्।
अलम् अर्जुनः **कर्णाय** अलम्।
अलम् लक्ष्मणः **मेघनादाय** अलम्।

अत्र 'अलम्' इति शब्दस्य योगे चतुर्थी विभक्तिः प्रयुक्ता।

1. कर्तृकर्मभाववाच्येषु क्रियारूपाणि अधोलिखितानि भवन्ति।

कर्तृवाच्ये	–	कर्मवाच्ये / भाववाच्ये
पठति	–	पठ्यते
लिखति	–	लिख्यते
खादति	–	खाद्यते
पिबति	–	पीयते
गायति	–	गीयते
हसति	–	हस्यते
शृणोति	–	श्रूयते

2. अव + लोकृ धातोः रूपाणि –

लट् लकारे

अवलोकयति	अवलोकयतः	अवलोकयन्ति
अवलोकयसि	अवलोकयथः	अवलोकयथ
अवलोकयामि	अवलोकयावः	अवलोकयामः

नवमः पाठः

[illegible]

(हमारे वातावरण में भौतिक सुख के साथ-साथ अनेकों प्रकार की आपदाएँ भी साथ-साथ लगी रहती हैं। प्राकृतिक आपदाएं जीवन को अस्त-व्यस्त कर देती हैं। कभी किसी महामारी की आपदा, बाढ़ तथा सूखे की आपदा या तूफान के रूप में महा भयंकर प्रलय – ये सब हम अपने जीवन में देखते रहते है। ऐसी ही एक प्राकृतिक आपदा है – भूकंप। जिसके बारे में इस पाठ में दृष्टिपात किया गया है। इस पाठ के माध्यम से यह बताया गया है कि किसी भी आपदा में बिना किसी घबराहट के, हिम्मत के साथ किस प्रकार हम अपनी सुरक्षा स्वयं कर सकते हैं।)

2001 तमे वर्षे गणतन्त्रदिवसपर्वणि यदा समग्रमपि भारतराष्ट्रं नृत्यगीतवादित्राणाम् उल्लासे मग्नमासीत् तदाकस्मादेव गुर्जरराज्यं पर्याकुलं, विपर्यस्तम्, क्रन्दनविकलं, विपन्नञ्च जातम्। भूकम्पस्य दारुणविभीषिका समस्तमपि गुर्जरक्षेत्रं विशेषेण च कच्छजनपदं ध्वंसावशेषु परिवर्तितवती। भूकम्पस्य केन्द्रभूतं भुजनगरं तु मृत्तिकाक्रीडनकमिव खण्डखण्डम् जातम्। बहुभूमिकानि भवनानि क्षणेनैव धराशायीनि जातानि। उत्खाता विद्युद्दीपस्तम्भाः। विशीर्णाः गृहसोपानमार्गाः। फालद्वये विभक्ता भूमिः। भूमिगर्भादुपरि निस्सरन्तीभिः दुर्वारजलधाराभिः महाप्लावनदृश्यम् उपस्थितम्। सहस्रमिताः प्राणिनस्तु क्षणेनैव मृताः। ध्वस्तभवनेषु सम्पीडिता

सहस्रशोऽन्ये सहायतार्थं करुणकरुणं क्रन्दन्ति स्म। हा दैव ! क्षुत्क्षामकण्ठाः मृतप्रायाः केचन शिशवस्तु ईश्वरकृपया एव द्वित्राणि दिनानि जीवनं धारितवन्तः।

इयमासीत् भैरवविभीषिका कच्छभूकम्पस्य। एतादृशी एव भयावहघटना कतिपयवर्षपूर्वं गढवालक्षेत्रे महाराष्ट्रे चापि घटिता। किञ्च, समग्रमपि विश्वमिदानीमातंकितं दृश्यते भूकम्पैः। विचित्रमिदम् पृथिव्याः कम्पनं येन हसन्, गायन्, नृत्यन् सुखेन जीवंश्च लोको नेत्रनिमीलनावधौ एव श्मशानतामुपयाति।

प्राक्तनयुगेऽपि भूकम्पा अजायन्त। देवराज इन्द्र एव प्रथमं व्यथमानां प्रकुपितां प्रचलन्तीं च पृथ्वीं शान्तामकरोदित्याह ऋग्वेदः। पृथ्वी कस्मात्प्रकम्पते वैज्ञानिकाः इति विषये कथयन्ति यत् पृथिव्या अन्तर्गर्भे विद्यमाना बृहत्यः पाषाणशिला यदा संघर्षणवशात् त्रुट्यन्ति तदा जायते भीषणं संस्खलनम्, संस्खलनजन्यं कम्पनं च। तदेव भयावहकम्पनं धराया उपरितलमप्यागत्य महाकम्पनं जनयति येन महाविनाशदृश्यं समुत्पद्यते।

ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायत इति कथयन्ति भूकम्पविशेषज्ञाः। पृथिव्याः गर्भे विद्यमानोऽग्निर्यदा खनिजमृत्तिकाशिलादिस चयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या पर्वताग्रमुखं विदार्य बहिर्निष्क्रामति। धूमभस्मावृतं जायते तदा गगनम्। सेल्सियशतापमात्राया अष्टशताङ्कतामुपगतोऽयं लावारसो यदा नदीवेगेन प्रवहति तदा पार्श्वस्थग्रामा नगराणि वा तदुदरे क्षणेनैव समाविशन्ति। आकाशे उच्छलन्तीभिः शिलाभिर्निहन्यन्ते पिपीलिका इव विवशाः प्राणिनः। ज्वालामुद्गिरन्त एते पर्वता अपि भीषणं भूकम्पं जनयन्ति।

यद्यपि दैवः प्रकोपो भूकम्पो नाम। यद्यपि तस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते, प्रकृतिसमक्षमद्यापि विज्ञानगर्वितो मानवः वामनकल्प एव तथापि भूकम्परहस्यज्ञाः कथयन्ति यत् बहुभूमिकभवननिर्माणं न करणीयम्। तटबन्धं निर्माय बृहन्मात्रं नदीजलमपि नैकस्मिन् स्थले पु जीकरणीयम् अन्यथा एवं कृते हि असन्तुलनवशाद् भूकम्पस्सम्भवति। वस्तुतः शान्तानि एव प चतत्त्वानि क्षितिजलपावकसमीरगगनानि भूतलस्य योगक्षेमाभ्यां कल्पन्ते। अशान्तानि खलु तान्येव महाविनाशम् उपस्थापयन्ति।

[illegible]

नृत्यगीतवादित्राणाम्	–	नृत्यगीतवाद्यानाम्	–	नाच गाने एवं बाजो के
पर्याकुलम्	–	व्याकुलम्	–	व्याकुल
विपर्यस्तम्	–	अस्तव्यस्तम्	–	अस्त-व्यस्त
क्रन्दनविकलम्	–	क्रन्दनेन विकलम्	–	क्रन्दन से व्याकुल
विपन्नम्	–	विपत्तियुक्तम्	–	विपत्तिग्रस्त
परिवर्तितवती	–	परिवर्तनं कृतवती	–	परिवर्तित कर दिया
मृत्तिकाक्रीडनकमिव	–	मृत्तिकायाः क्रीडनकमिव	–	मिट्टी के खिलौने के समान
बहुभूमिकानि	–	बहव्य. भूमिकाः	–	बहुमंज़िले मकान
उत्खाताः	–	उत्पाटिताः	–	उखड गए
विद्युद्दीपस्तम्भाः	–	विद्युतः दीपाः तेषाम् स्तम्भाः (तत्पुरुष)	–	बिजली के खम्भे

विशीर्णाः	–	नष्टाः	–	बिखर गए
फालद्वये	–	खण्डद्वये	–	दो खण्डो मे
निस्सरन्तीभिः	–	आगच्छन्तीभिः	–	निकलती हुई ; बाहर आती हुई
दुर्वार	–	दुःखेन निवारयितु योग्यम्	–	जिनको हटाना कठिन है।
महाप्लावनम्	–	महत् प्लावनम्	–	विशाल बाढ
प्राणिनः	–	प्राणवन्तः	–	प्राणवान् प्राणी
नेत्रनिमीलनावधौ	–	नेत्रनिमीलनस्य अवधौ	–	नेत्र बन्द करने में लगने वाला समय (क्षण भर में)
श्मशानताम्	–	श्मशानभावम्	–	श्मशान जैसी दशा को
विचारणीयम्	–	विचारयोग्यम्	–	विचार करने योग्य
अजायन्त	–	उत्पन्नाः जाताः	–	उत्पन्न हुए
बृहत्यः	–	महत्यः	–	विशाल, बडी
क्वथयति	–	उत्तप्तं करोति	–	उबालती है, तपाती है
विदार्य	–	विदीर्णं कृत्वा	–	फाडकर
उच्छलन्तीभिः	–	उपरि गच्छन्तीभि.	–	उछलती हुई
उद्‌गिरन्तः	–	प्रकटयन्तः	–	प्रकट करते हुए
योगक्षेम	–	अप्राप्तस्य प्राप्ति योगः योगस्य रक्षणं इति क्षेम	–	अप्राप्त की प्राप्ति और प्राप्त का रक्षण।

[illegible]

- गणतंत्रदिवससमारोहे गुर्जरराज्यस्य कच्छजनपदे विशेषतः भुजनगरे महाविनाशकारी भूकम्प. जातः।
- भूमिगर्भात् बहिः आगच्छन्तीभिः जलधाराभिः महाप्लावनस्य दृश्यम् उपस्थापितम्।
- अनेके जनाः अस्या दारुणविभीषिकायां मृताः परं केचन ईशकृपया रक्षिताः।
- भूकम्पस्य अन्याः घटनाः गढवालप्रदेशे, महाराष्ट्रप्रदेशे अपि घटिताः।
- भूकम्पेन नेत्रनिमीलिनावधौ हसन् खेलन् च जगत् श्मशानतां नीयते।
- विशालपाषाणशिलाना त्रुटनेन स्खलनं भवति, स्खलनेन च कम्पनम्। एतस्य एव कम्पनस्य

धरायाः उपरितले आगते महत्कम्पनं भवति, येन महाविनाशः सम्भवति।

- ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायते।
- यद्यपि भूकम्परोद्धुं कश्चित् सुनिश्चितोपायः नास्ति तथापि बहुतलात्मकभवनानां निर्माणं परित्यज्य, महाजलाशयानां निर्माणं त्यक्त्वा, पञ्चभूतानां नैसर्गिकसतुलने विघातं विहाय भूकम्पं किञ्चित् न्यूनं कर्तुं शक्यते।

[illegible]

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकैनैव पदेन वदत–**
   - क. समस्तराष्ट्रं केषाम् उल्लासे मग्नं आसीत् ?
   - ख. भूकम्पस्य केन्द्रबिन्दुः कः जनपदः आसीत् ?
   - ग. पृथिव्याः स्खलनात् किं जायते ?
   - घ. समग्रो विश्वः कैः आतंकितः दृश्यते ?
   - ङ. केषां पर्वतानां विस्फोटैरपि भूकम्पो जायते ?
   - च. कीदृशानि भवनानि धराशायिनः जायन्ते ?

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत–**
   - क. पृथिव्याः प्रकोपः कथं विचित्रः प्रतिभाति ?
